# Shri Venkatesha Stotram 5

# શ્રીવેઙ્કટેશસ્તોત્રમ્ ૫

## Document Information

Text title : Shri Venkatesha Stotram 5

File name : venkaTeshastotram5.itx

Category : vishhnu, venkateshwara, vAsudevAnanda-sarasvatI

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીવેङ્કટેશસ્તોત્રમ્ ૫

વ્યેમિત્યવ્યયમાખ્યાતં મુનિભિઃ પાપવાચકમ્ ।
કટતે નાશનાર્થત્વાત્પાપહા વેङ્કટેશ્વરઃ ॥ ૧॥

યો ભક્તરક્ષણાર્થાય વિષ્ણુર્વૈકુણ્ઠવાસ્યયમ્ ।
શેષાચલે મહાલક્ષ્મ્યા સહ તિષ્ઠતિ વેङ્કટઃ ॥ ૨॥

ચતુર્બાહુરુદારાઙ્ગો નિજલાઞ્છનલાઞ્છિતઃ ।
વેङ્કટેશ ઇતિ ખ્યાતો દેવઃ પદ્માવતીપ્રિયઃ ॥ ૩॥

શેષાચલં મહત્તુઙ્ગં સર્વસમ્પત્સમન્વિતમ્ ।
વૈકુણ્ઠતુલ્યમકરોચ્છ્રીનિવાસઃ સ નોઽવતુ ॥ ૪॥

યદ્દર્શનાર્થમખિલા ઋષિયોગિસુરાદયઃ ।
આયાન્તિ પરયા ભક્ત્યા સપત્નીકાશ્ચ સાનુગાઃ ॥ ૫॥

વિશેષાદાશ્વિને માસે મહોત્સવદિદૃક્ષવઃ ।
ભક્તાનુકમ્પી ભગવાન્વેङ્કટેશઃ સ નોઽવતુ ॥ ૬॥

સ ત્વં માં પાહિ દેવેશ લક્ષ્મીશ ગરુડધ્વજ ।
સર્વાપત્તિવિનાશાય પ્રસન્નો ભવ સર્વદા ॥ ૭॥

પ્રસીદ લક્ષ્મીરમણ પ્રસીદ પ્રસીદ શેષાદ્રિશય પ્રસીદ ।
દારિદ્ર્યદુઃખૌઘભયં હરન્તં તં વેङ્કટેશં શરણં પ્રપદ્યે ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીવેङ્કટેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Please send corrections to *sanskrit@cheerful.com*